श्री शिव स्तोत्रं (उपमन्यु कृतं)

श्री शिव स्तोत्रं (उपमन्यु कृतं)

जय शंकर पार्वतीपते मृड शंभो शशिखंडमंडन |
मदनांतक भक्तवत्सल प्रियकैलास दयासुधांबुधे || 1 ||

सदुपायकथास्वपंडितो हृदये दुःखशरेण खंडितः |
शशिखंडशिखंडमंडनं शरणं यामि शरण्यमीश्वरं || 2 ||

महतः परितः प्रसर्पतस्तमसो दर्शनभेदिनो भिदे |
दिननाथ इव स्वतेजसा हृदयव्योम्नि मनागुदेहि नः || 3 ||

न वयं तव चर्मचक्षुषा पदवीमप्युपवीक्षितुं क्षमाः |
कृपयाऽभयदेन चक्षुषा सकलेनेश विलोकयाशु नः || 4 ||

त्वदनुस्मृतिरेव पावनी स्तुतियुक्ता न हि वक्तुमीश सा |
मधुरं हि पयः स्वभावतो ननु कीदृक्सितशर्करान्वितं || 5 ||

सविषोऽप्यमृतायते भवांछवमुंडाभरणोऽपि पावनः |
भव एव भवांतकः सतां समदृष्टिर्विषमेक्षणोऽपि सन् || 6 ||

अपि शूलधरो निरामयो दृढवैराग्यरतोऽपि रागवान् |
अपि भैक्ष्यचरो महेश्वरश्चरितं चित्रमिदं हि ते प्रभो || 7 ||

वितरत्यभिवांछितं दृशा परिदृष्टः किल कल्पपादपः |
हृदये स्मृत एव धीमते नमतेऽभीष्टफलप्रदो भवान् || 8 ||

सहसैव भुजंगपाशवान्विनिगृह्णाति न यावदंतकः |
अभयं कुरु तावदाशु मे गतजीवस्य पुनः किमौषधैः || 9 ||

सविषैरिव भीमपन्नगैर्विषयैरेभिरलं परिक्षतं |
अमृतैरिव संभ्रमेण मामभिषिंचाशु दयावलोकनैः || 10 ||

मुनयो बहवोऽद्य धन्यतां गमिताः स्वाभिमतार्थदर्शिनः |
करुणाकर येन तेन मामवसन्नं ननु पश्य चक्षुषा || 11 ||

प्रणमाम्यथ यामि चापरं शरणं कं कृपणाभयप्रदं |
विरहीव विभो प्रियामयं परिपश्यामि भवन्मयं जगत् || 12 ||

बहवो भवताऽनुकंपिताः किमितीशान न मानुकंपसे |
दधता किमु मंदराचलं परमाणुः कमठेन दुर्धरः || 13 ||

अशुचिं यदि मानुमन्यसे किमिदं मूर्ध्नि कपालदाम ते |
उत शाठ्यमसाधुसंगिनं विषलक्ष्मासि न किं द्विजिह्वधृक् || 14 ||

क्व दृशं विदधामि किं करोम्यनुतिष्ठामि कथं भयाकुलः |
क्व नु तिष्ठसि रक्ष रक्ष माममयि शंभो शरणागतोऽस्मि ते || 15 ||

विलुठाम्यवनौ किमाकुलः किमुरो हन्मि शिरश्छिनद्मि वा |
किमु रोदिमि रारटीमि किं कृपणं मां न यदीक्षसे प्रभो || 16 ||

शिव सर्वग शर्व शर्मद प्रणतो देव दयां कुरुष्व मे |
नम ईश्वर नाथ दिक्पते पुनरेवेश नमो नमोऽस्तु ते || 17 ||

शरणं तरुणेंदुशेखरः शरणं मे गिरिराजकन्यका |
शरणं पुनरेव तावुभौ शरणं नान्यदुपैमि दैवतं || 18 ||

उपमन्युकृतं स्तवोत्तमं जपतः शंभुसमीपवर्तिनः |
अभिवांछितभाग्यसंपदः परमायुः प्रददाति शंकरः || 19 ||

उपमन्युकृतं स्तवोत्तमं प्रजपेद्यस्तु शिवस्य सन्निधौ |
शिवलोकमवाप्य सोऽचिरात्सह तेनैव शिवेन मोदते || 20 ||

इत्युपमन्युकृतं शिवस्तोत्रं संपूर्णं |